लोऽरिक्तप्रकृतिः विदुर्गो मित्रहीनो दुर्बलश्छेत्तव्यः पीडनीयो मंत्रबलहीनः प्रबलो मंत्रयुक्तः कर्षणीयः
तथा च राजमानसोल्लासे निर्मूलनामुच्छेदं पीडनं बलनिग्रहं कर्षणं तु पुनः प्राहुः कोशबलाधिक
कर्षणीयं प्राकृतारिमित्रोदासीनानाह अनंतरस्तत्परः पर इति अनंतरः प्राकृतोऽरिस्तत्परः प्राकृत
मित्रं तस्मात्परः प्राकृत उदासीनः शेषाः पुनः प्रसिद्धत्वान्नोक्ताः एतद्राजमंडलं क्रमशः पूर्वादिक्र
मेण चिंत्यं एवं चतुर्दिक्षु त्रयस्त्रय आत्मा चैक इति त्रयोदशराजकं मंडलं प्राकारं ये च पालिग्राहादय
स्तेऽप्यत्रैवांतर्भवंति सामादिभिरित्युक्तं तान् सामादीनुपानाह याज्ञवल्क्यः उपायाः साम दानं च भे
दो दंडस्तथैव च सम्यक् प्रयुक्ताः सिद्ध्युर्दंडस्त्वगतिका गतिः भेदः शत्रुसामंतादीनां परस्परं वैरोत्पाद
नं स एव सज्जेतुं न्यायतो शक्यो लुब्धेनाकृतबुद्धिना सत्यसंधेन शुचिना सुसहायेन धीमता यथा
शास्त्रं प्रयुक्तस्स देवासुरमानुषं जगदानंदयेत्सर्वमन्यथा तु प्रकोपयेत् अधर्मदंडनं स्वर्गकीर्तिलो ३९
कविनाशनं सम्यक् दंडनं राज्ञः स्वर्गकीर्तिजयावहं मनुः अदंड्यान्दंडयन् राजा दंड्यांश्चैवाप्यदंड

यन् अयशो महदाप्नोति नरकं चैव गच्छतीति दंडप्राकारं दंड्या दंड्यव्यवस्थां व्यवहाराध्याये दर्शयिष्यामः
एवं त्रपितिसांत पुरं शोधयित्वा प्रविशेत् यथा कारयेद्वृन शोधनमाह सौमाल हरंतिकमपि प्रविविक्षुः आ
स्वप्नस्थानगतश्चाविशेषं चूसंकटिच गहने च न तिष्ठेत् तथा निर्गमे च प्रवेशे च राजमार्गे समंत
तः शोत्साहितजनं गच्छेत्स्वपन्नविकृतोन्नतिः मात्रोत्सवसमाजेषु उज्वलसंबाधशालिनः प्रदेशा
न्न वगाहेत नातिवेलं संप्रपतेत् निषेवितो वर्षधरैः कंचुकी शीर्षशालिभिः अंतःपुरे च विचरे
त्कुब्जकैरात्तवामनैः नीचैरंतःपुरामात्यास्तु चपर्श्वितवेदिनः शस्त्राग्निविषवर्जाहिनमर्येयुर्मही
पतिं अंतःपुरशोधनमाह कामंदकः आशीतिकाश्च पुरुषाः पंचाशीत्स्त्रियोषितः बुध्येरन्नवरोधा
नं शौचमागारिकाः स्वयं अभ्यंतरगतोपीह विश्वास्तं स्त्रीषु न व्रजेत् दिष्टिष्टमनगतं भ्रातं भद्रसेनम
हारयत् मातुः शय्यांतरे लीनः करूषं चौरसः सुतः नहि देवीगृहं गच्छेदात्मीयात्संनिवेशनात्
तथा सत्र एवं चरितमुक्तं नीतिसारे विशेषेण तु संयोज्य मधुनेति विलोभितं देवी तु काशिराजेंद्र
निजघान रहोगतं विषाक्तेन च सौवीरं मेखलामणिना नृपं वैरूप्यं तास्त्री समादाय यथा चाप्यविदू
रथं इति तत्परिहरणाय दास्यापि प्रयोजयेत् यस्य दाराः सुगुप्तास्तु पुरुषैराप्तकारिभिः सर्वलोकाभि
तं तस्य हस्ते लोकद्वयं स्थितं एवं शास्त्रविधानेन पुरं प्रविशेत् अथ भार्यागमनमुक्तं कामंदकेन धं
र्ममविच्छिन्नरपतिः सर्वदारान् न तु क्रमं गच्छेद्वृत्तु निरोगान् नित्यं वाजीकरणबृंहितः वाजीकरणादिकं
च कामशास्त्रादवगंतव्यं विस्तृतिभयान्नेहोनरूपित नीतिसारे विचार्यकार्यावयवान्दिनक्षये

विसृज्य लोकं प्रमदादतुक्रियः समास्त्रबंधेन हि साधुपाणिना स्वपित्यसक्तः परमार्थरक्षितः तथा
नयेन जाग्रत्यनिशं नरेश्वरः सुखं स्वयं तीह निराधयः प्रजाः प्रमत्तचित्ते सति जाग्रति प्रजाः प्रजागरे
ण स्यजगत्त्रबाधत इति एवं तिष्ठतः फलमाह वराहमिहिरः आचारवान् सागरांतां धरित्रीं भुंक्ते
दीर्घकालमुतनातशत्रुः पवित्राचारस्तत्र धर्मस्य वृद्धिर्मोदे भोगानंदेह नैव भुंक्ते भारते धृतिः क्षमो
दमः शौचं कारुण्यं वागनिष्ठुरा मित्राणां चानभिद्रोह एताः सप्त समिधः श्रियः सप्त समिधो वर्द्धनानि इति स
परिकरस्वामिनिरूपणं अथामात्यः तत्र पुत्रोप्यमात्यमध्ये परिगणितो नीतिसारे अमात्यो युव
राजश्च भुजावेतौ महीपतेरिति राजपुत्रस्य कृत्यमुक्तं पितुस्त्वापरक्लिष्टे कार्य वा ज्ञानस्ते सदा
तत्कर्म कुर्यात्प्रियं तं येन तुष्टो भवेत्पिता तन्न कुर्याद्येन पिता मनागपि न सीदति तथा यस्मिन्नपि
तु तुष्टे वेत्ति नीतिः स्वयं तस्मिन्न प्रियं चरेत् तस्मिन् द्वेषं पिता कुर्यात्स्वस्यापि द्विष्यात् एवं सः अन्तं मंतविके
ष्टं च पितुर्नैव समाचरेत् प्राप्यापि युवराजत्वं प्राप्य याद्धि कृतं न च स्वस्तंपत्तिमदान्नैव मातरं पितरं तथा
भ्रातरं भगिनीं चापि अन्यांश्चाराजवद्धवान् मल्लाजनोंस्तथा राज्ञेनावमन्येन्नपीडयेत् प्राप्यापि
महतीं वृद्धिं वर्तेत पितुराज्ञया पितुस्थपितुराज्ञा हि परमं भूषणं स्मृतं सोदरेषु च सर्वेषु नाधिकं
स्व दर्शयेत् भ्रातॄणामवमानेन बहवो हि विनाशिताः पितुराज्ञोल्लंघनेन प्राप्यापि पदमुत्तमं
तस्माद्भ्रष्टा भवंतीह दासवद्राजपुत्रकाः एवं यहा विरोधेन राजपुत्रो वसन्नरस्ह [illegible] त्यागी च सत्याच स ४०

पन्नः सर्वान् कुर्याद्वशे स्वके शनैः शनैः प्रवर्द्धेत शुक्लपक्षमृगांकवत् एवं वृत्तो राजपुत्रो राज्यं प्राप्याप्यकंट
कं सहायवान् सतामात्यो चिरं च भुंक्ते वसुंधरां एतद्राजपुत्रो विशेषमत्र उक्तं सामान्यात्तु पूर्वोक्ता
वक्ष्यमाणाश्च गुणाः सर्वे अपेक्षिता एव तेषां राजपुत्राणां रक्षणं रक्षणं प्रयत्नतः कुर्यादित्याह कामं
दकः प्रजार्थं श्रियस्ते राजा कुर्वीतात्मजरक्षणं लोलुप्यमानास्ते येषु हन्युरेनमरक्षिताः राजपुत्रमदो
द्धृता गजा इव निरंकुशाः भ्रातरं चाभिनिघ्नंति पितरं चाभिमानिनः राजपुत्रैर्मदोद्धृतैः प्राप्यमानमि
तस्ततः दुःखेन रक्ष्यते राज्यं व्याघ्राघ्रातमिवामिषं रक्ष्यमाणा यदि छिद्रं रूपं चित्रांकुर्वंतिते सिंहशा
वा इव घ्नंति रक्षितारमसंशयं विनयोपग्रहान् भूत्यै कुर्वीत नृपतिः सुतान् अविनीतकुमारं हि कुल
माशु विनश्यति वीनीतमौरस्तु पुत्रं यौवराज्येभिषेचयेत् दुष्टं गजमिवोद्वृत्तं कुर्वीत सुखबंधनं तथा
ताडनीयः पालनीयो भवत्यापेक्षया च [illegible] योप्यास्य दुर्नयी सुतः दुर्वृत्तं प्रत्याहरा
जपुत्रः सुदुर्वृत्तः परित्यागं हि नार्हति क्लिश्यमानः सपितरं परानाश्रित्य हंति हि व्यसने सज्जमानं हि कि
[illegible] इति राजपुत्रनिरूपणं अमात्यस्त्रिविधः उत्तममध्यमाधमभेदात् तदुक्तं महाभा
रते त्रिविधाः पुरुषा लोके उत्तमाधममध्यमाः तेषां च सम्वेतानां गुणदोषान्वदाम्यहं मंत्री त्वेहितसंयु
क्तः समर्थो यश्च निश्चये मित्रैर्वापि समानार्थैर्बंधिर्वै स प्रगल्हितैः समंत्रयित्वा यः कर्म प्रारंभे संप्र
वर्तते धैर्याद्वि कुरुते यत्नं तमाहुः पुरुषोत्तमं एकोर्थान्विमृश्य यो धर्मे च कुरुते मति एकः कार्याणि

कुरुते तमाहुर्मध्यमं नरं । एवं दोषाननिश्चित्य दैवमेव व्यपाश्रितः करिष्यामीति यः कार्योपेक्षकः स नरा
धम इति याज्ञवल्क्य समंत्रिणः प्रकुर्वीत प्राज्ञान्मौलान्स्थिरान्शुचीन् तैः सार्द्धं चिंतयेद्राज्यं विप्रेणाथ
ततः स्वयमिति मनुः सरव्योनम्यार मौलान्शास्त्रविदः शूरान् लब्धलक्षान् कुलोद्भवान् सचिवान्सप्त
चाष्टौ वा कुर्वीत सुपरीक्षितानिति लब्धलक्षांश्चतुरान् मौलान्स्ववंशपरंपरायातान् नीतिसारे कुली
नाः शुचयः शूराः श्रुतवंतोऽनुरागिणः दंडनीतेः प्रयोक्तारः सचिवाः स्युर्महीपतेः तथा स्मृतिस्तत्परता
पेक्षु वितर्को ज्ञाननिश्चयः दृढता मंत्रगुप्तिश्च मंत्रिसंपत्प्रकीर्तिता सज्जमानमकार्येषु निरुंध्युर्मंत्रि
णो नृपं गुरुणामिव चैतेषां शृणुयाद्वचनं नृपः पुरोहितं कुर्यात्तत्रैव तथा चंद्रोदयनीत्यां च कुर्याज्ञो
स्य पुरोहितः अथर्वविहितं कर्म कुर्याच्छांतिकपौष्टिकं तादृक्संवत्सरोप्यस्य ज्योतिःशास्त्रस्य चिंतकः
प्रश्नानिधातकुशलो होरागणिततत्त्ववित् इत्यमात्यादिनिरूपणं सुहृन्निरूपणं तथा पद्माः पर्वकृतमे
व गुणाग्रकुकेचनोच्यंते अमात्यानां स्वकमध्ये तंभावः सुहृदस्त्वमित्राणीति भेदः तेषां कृत्यमुक्तं कामंद
कीन नृपस्य ते हि सुहृदः स्वाः वृद्धवोमताः परस्थानमुत्पथगतं वा स्वयं त्वनिवारिताः सज्जमानमका
र्येषु सुहृदो धारयंति ये सत्यं ते नैव सुहृदो गुरवो गुरवो हि ते कृतविद्योपि बालेनाप्यकेशांतेन
रज्यते रागी नुरक्तः चित्तसंरक्षिन्नकुर्यादसौ सांप्रतं तथा त्यागविज्ञानसत्याढ्यो महापक्षः प्रियंवदः ४१
अथातिक्रमं मद्वेष्यमित्रं कुर्वीत सत्कुलं समुत्पन्नेषु कार्येषु दीक्षणेषु भयसंशयः दर्शयित्यन्यहृदये:

कुलीनश्चातुरस्तथा तौ धर्मार्थकामसंयोगो मित्रात्तु त्रिविधं फलं यस्मादेतत्त्रयं न स्यात्तन्न सेवेत पंडितः
शुचित्वत्यागिता शौर्यं समानं सुखदुःखता अनुरागश्च दाक्ष्यं च सत्यता च सुहृद्गुणाः तदपि राजनु
गम्यं साक्षिप्तं मित्रलक्षणं यस्मिन्नेतत्र तन्मित्रं तत्रात्मानं न निक्षिपेत् न विश्वसेदित्यर्थः प्रायो मित्राणि
कुर्वीत सर्वावस्थासु भूपतिः बहुमित्रो हि शक्नोति वशे स्थापयितुं रिपून् न तत्र तिष्ठति भ्राता न पिता नान्यो
मित्रवाजनः पुंसां नापत्प्रतीकारे सन्मित्रं यत्र तिष्ठति अतित्रासः सर्वतोमित्रैर्निर्दिष्टा हि याद दृढव्रतेरिति
सुहृन्निरूपणं अथ कोशः तस्य मुख्यत्वमाह वराहमिहिरः कोशो हि राज्यतत्त्वमूलमतो हि शास्त्राः
पक्षी विपक्षं द्रव्याकं निधनं करोति अन्यादि वैद्रिपगणैर्वस्तु तस्य पालनं तत्प्राप्तिरक्षणविवृद्धिषु यत्न
वान्स्यात् भारते मधुदोहं दुहेद्राष्ट्रं भ्रमरा इव पादपं वत्सापेक्षी दुहेच्चैव स्तनांश्च न विकुट्टयेत्
विकुट्टयेच्छोषयेत् तथा यः कश्चिज्जनयेदर्थं राज्ञा रक्ष्यः स मानवः यो राजकोशं नश्यंतं नाचक्षीत
युधिष्ठिर श्रोतव्यस्तस्य च रहो रक्ष्यश्चामात्यतो भवेत् अमात्या ह्युपहर्तारं ज्ञातिवा घ्नंति भारत उ
पहर्तारं राज्ञे निवेदयितारं राजकोशस्य गोप्तारं राजकोशाध्यक्षोपकाः सर्वे तमनुधावंति स विनश्यत्य
रक्षितः अनुधावंति मारयितुं धावंतीत्यर्थः कामंदकः वर्द्धमानोल्पनिस्रावः ख्यातः पूजितदैवतः
ईप्सितः द्रव्यसंपूर्णो हि धर्मी आप्तैरधिष्ठितः मुक्ताकनकरत्नाढ्यः पितृपैतामहोचितः गजे
ष्वारोपितः साधुशीघ्रपानैरधिष्ठितः यत्र राजा तत्र कोशः कोशाधीना हि राजता तथा धर्मार्जितो व्यय

४२ सहः कोशः कोशज्ञसंमतः धर्महेतोस्तथा पाप्यविभृत्यानां भरणाय च आपदर्थं च संरक्ष्यः कोशः कोशज्ञैः
संमतः धर्महेतोस्तथा वृत्तासदा पुत्राद्यपि हि संरक्ष्यो भार्यायाः सुहृदस्तथा नीतिसारे नान्यायेन च व्य
यं कुर्यात्त्रत्य चक्षोसवाच हं कृषिर्वाणिक्यपथो दुर्गं सेतुः कुंजरबंधनं खन्यः करधनादानं स्वस्थापि
तोपि वर्द्धयेदिति भागत्रक्तो विधर्मे तस्मात्त्रिभागं वित्तस्य जीवनाय प्रकल्पयेत् भागद्वयं तु धर्मार्थि
मनित्यं जीवितं यतः भागत्रयं वित्तस्य एकं जीवनाय द्वौ धर्माय भागपंचकं कृत्वा त्रितयं जीवनाय भागं
द्वयं धर्मायेति हेमाद्रिः कृपणं राज्ञा निषेधे भारते एकांगं दद्यात् दद्यादर्धं दद्याच्चतुर्गुणं ग्रती ग्रतस
हस्त्ये तु दद्यात्सर्वे स्मिन् फलाः स्मृता इति दत्तां त्रां दद्यात् इति भावः इति कोशः राष्ट्रमुक्तं नीतिसारे
स राज्यांगानां तु सर्वेषां राष्ट्रं नातिस्सम्भवः तस्मात्सर्वप्रयत्नेन राजा राष्ट्रं प्रसाधयेत् तस्माद्दस्माद्दस्यून्
पापिष्ठान्स्तान्घ्नन् पापेन लिप्यते ये ये प्रजाः प्रवाधेरन् महीपतिः येमार्याः क्रियमाणं हि संस्तत्याम्य
वेदिनः स धर्मो यं विगर्हंति तं तम धर्मे प्रचक्षते धर्माधर्मौ विजानन्हि शास्त्रनोप्रिरतः सतां प्रजारक्षेन्न
पः साधु हन्यान्नपरिपंथिनः राष्ट्रोपघातकुर्वीरन् ये पापा राजवल्लभाः एकैकशः संहतान्वा दृष्ट्वा स्ता
न्परिचक्षते दृष्ट्वा न दृष्ट्वा शुद्धदंडेन हन्याद्राजा विलंबितं अदृश्यं वा प्रकाशं वा लोकं द्वेषं समाश्रितान् त ४२
था अरक्ष्यमाणाः कुर्वंति यत्किंचित्किल्बिषं प्रजाः तस्मात्तु नृपतेरर्द्धं यस्मा जग्राहत्यसौ करान् सर्वतो
धर्मषड्भागो राज्ञो भवति रक्षितः अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षितुः यथा बीजांकुरः सूक्ष्मः पारि

पुष्टोभिरक्षितः काले फलाय भवति साधु तद्वदपि प्रजा। उद्वेजयति तीक्ष्णेन मृदुना परिभूयते तस्माद्यथा
र्हं तीक्ष्णं नृपेत्यहमनाश्रितः याज्ञवल्क्यः पीड्यमानाः प्रजारक्षेत्कायस्थैश्च विशेषतः इति भारतेपि उद्वि
ग्यते धर्मरक्तम धर्मो वर्त्तते महान् नृपमाहुर्दिवात्रे रायदा पापोनवार्ह तद इति राजधर्मेषु विक्रियंक्रम
मध्वानं भक्तं च सपरिव्ययं योगक्षेमं च संप्रेक्ष्य वणिजः कारयेत्करान् उत्पत्तिं दानवृत्तिं च शिल्पं
संप्रेक्ष्य वास्तकृत् शिल्पं प्रतिकरानेवम् शिल्पिनः प्रतिकारयेत् तथा यथा न हीयेरन् प्रजाः कुर्यान्मही
पतिः सत्यज्ञात पालिता तेरा जानमतिख्यापितं न कर्म कुरुते वत्सो भृशं दुग्धो युधिष्ठिर राष्ट्रमप्यति
दुग्धं हि न कर्म कुरुते महत् यो राष्ट्रमनुगृह्णाति तपश्च स्वयं नृपः संजातमुपजीवन्सल्लभते सुम
हत्फलं पौरान् ज्ञातपदोच्चेर्वो संश्रितोपाश्रितांस्तथा यथाशक्त्यानुकंपेत सर्वानिष्पधनानपि
तथा प्रजारक्षणं भृत्यभरणं व्यसनं ग्रामतो नयं योगक्षेमं च संप्रेक्ष्य गोमिनः कारयेत्करं तथा यथावामत्र
मतंत्रकरान्संप्रणयेन्मृदुनेति इति राष्ट्रं दुर्गकरणं पंडुवमाह कामंदकः भरुडगैर्वृतैराष्ट्रं तद्वृद्धि
नृप वर्द्धये तस्मात् दुर्गवतीं भूमिं भर्त्ये भृपत्स्तु कारयेत् सस्याकरवतीं पुण्यां सवनिद्रव्यसमाचितां अदे
वमातृका चेति रम्यतां भिर्विभरतये निषिद्धभूमिमाह स एव सदार्करा सूपाषाणसा छवी नित्य तस्क
रा रूक्षा सकंटकवना सव्याला चेति भिरसः रुक्षान्यदिनेपेक्षया चतुर्दण्ड पंच दण्डगादि जलसेके न
सस्यजेनी जनपदमाह स एव स्वाजीव्यो भरुडलेपुर्वकः सानूपः पर्वताश्रयः शूद्रकारुवणिक्प्रायो

नीतिम०
५२

महारंभकृषीबलः सानुरागो रिपुद्वेषी पीडाकारस्तहः पृथुः नानादेश्यैः समाकीर्णो धार्मिकः पशुमान्ध
नी तं वर्द्धयेत् प्रयत्नेन तस्मात्त्वं प्रवर्त्तते पुरमाह पृथुसिंममतास्यात् सुगुप्राकारगोपुर समावासेत् पु
रं गौलं सरीन्मरुवनाश्रयं याज्ञवल्क्यः रम्यं पशव्यमाजीव्यं जांगलं देशमावसेत् तत्र दुर्गाणि कुर्वी
त जनकोशात्मगुप्तये पशव्यं पशुवृद्धिकरं कंदमूलफलादिभिराजीव्यं जांगलं सजलतृणपर्वतं
दुर्गमाह मनुः धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च नृदुर्गं गिरिदुर्गं च समाश्रित्य वसेत्पुरं कामंद
कस्तु ऐरिणमपि पपाठ औदकं पार्वतं वार्क्षमैरिणं धान्वमानवं प्रशस्तान्यास्रसतानि दुर्गं दुर्गविचि
तकैः इरिणमूषरं धन्वानिरुदकं स्थलं मरुस्थलमित्यर्थः महीदुर्गमित्यत्र मलो दुर्गं महीरूपमेव
वा तत्र नैसर्गिकं पाषाणमैष्टकं वा तथा च महाभारते महीदुर्गं पेक्ष्या मृदुर्गस्य पृथ्वी द्विदैः कृतः
६ धन्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च मनुष्यदुर्गं मृत्दुर्गं वनदुर्गं च तानि षडिति वं धनुदुर्गेतो द्वा
दिवै धुनां राजगृहस्य परितः स्थानानि तत्र वंधुदुर्गं मनुष्यदुर्गयोः पृथग्ग्रहणं गोबलीवर्दन्यायो
न अंतरंगत्वाद्भूरत्वाद्वं बधूनां पृथ्वाज्ञै दैर्यः तथा यावद्बंधुदुर्गं संभवति तावदितरं मनुष्यदुर्गं ने
१५ कुर्वीतीति एवं चद्दुर्गस्य भवं बलं संपद्यतो धन्वदुर्गं महीदुर्गमित्यत्र द्वे जलदुर्गं संवृक्षदुर्गं नृदुर्गं गिरि
दुर्गं वंधुदुर्गं ऐरिणदुर्गं महीदुर्गे मृदादीनां विशेषः पूर्वमुक्त एव दुर्गस्य गुणमाह मनुः एकः शं
तं योधयति प्राकारस्थो धनुर्द्धरः शतं दशसहस्राणि तस्मात् दुर्गं समाश्रयेत् दुर्गाणामपि ५२

पराभवं प्राप्नुवंतीत्यर्थः तत्र सर्वदुर्गाणां प्राशस्त्ये च गिरिदुर्गे विशेषमाह मनुः सर्वेण तु प्रयत्नेन गिरिदुर्गं
समाश्रयेत् एतेषां बाहुगुण्येन गिरिदुर्गं विशेषमाह मनुः सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् एते
षां बाहुगुण्येन गिरिदुर्गं विशेषमाह विशिष्यते एतेषामिति निर्द्धारणे षष्ठी तादृशे पि मनुः तस्मादा
युधसंपन्नं धनधान्येन वाहनैः ब्राह्मणैः शिल्पिभिर्मंत्रैर्यवसेनोदकेंधनैः मंत्रैःसयादिमंत्रविद्भि
र्मनुष्यैरित्यर्थः भारते दुर्गं प्रकृत्य शूरान्यजनसंपन्नं ब्रह्मघोषानुनादितं वक्ष्यमाणलक्षणो राजाते
त्र संस्थयमाविशेत् तत्र कोशं बलं मित्रं व्यवहारं च वर्द्धयेत् इति संवृत्तं आरामादिषु तत्तद्वृत्तप्र
जितवृक्षसहितं तत्तत्फलपुष्पादिसहितं वा तत्तदेतयोग्यसामग्रीसहितं सर्ववस्तुसम
न्वितमित्य + मनुः तस्य स्यात् सर्वगुप्तार्थं कार्यं वेश्मात्मनः गुप्तं सर्वर्तुकं शुभ्रं जलवृक्षसमान्वि
तमिति + ऽर्थः इति दुर्गं अथ बलं तत्र मुहूर्त्ताद्यपेक्षया बलस्य प्राधान्यमाह वराहमिहिरः ग्र
हर्क्षतिथ्युद्गमरात्रिहोमाद्रे क्वाणभाग्यान्तु कलमात्रं भवेत्पिपासोर्यदि सिद्धिहेतुः स्वयं न वेदेव वि
ध्वराज्ञा मंत्राभिषेकमणिबंधनशांतिकर्महोमोपवासस्वस्त्ययनतथादिमात्रं स्यात् सिद्धिहेतुरु
पचेहितिगीवृतोरिक्तस्मात्तदानस्पतिनन्नेतुरोधाः तथा बुद्धापिशास्त्राण्यपि मंत्रिणोपि कु
र्युः ग्रहमंदरेण्वालि यथा निजा त्यक्तिययाति पातिकोम्यापेक्षान न वेत्प्रधानं अतो वस्यं बलं की
लाधीनं राज्यं ननु जयपराजयादिकं सर्वं कर्माधीनं तत्र किं बलादिनेति चेत् उच्यते न केवलं स

४६ वं कर्माधीनं किंतु पुरुषकाराधीनमपि उक्तं च याज्ञवल्क्येन यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्
एवं पुरुषकारेण विना दैवं न सिध्यतीति माघेनालंबते दैष्टिकतां न नीषीदति पौरुषे शब्दार्थौ सत्क
विरिव द्वयं विद्वानपेक्षत इति ननु तर्हि क्वचित् पुरुषकारे कृतेपि न फलप्राप्तिः उच्यते न वयं क
र्मणः कारणत्वमेव खंडयामः किंतु तन्मात्रस्य वस्तुतस्तु न हि कर्म पुरुषकारापेक्षया भिन्नमस्ति
पूर्वजन्मार्जितः पुरुषका■कृतेपि न फलप्राप्तिः उच्यते न वयं कर्मणः कारणत्वमेव खंडयामः कि
तु तन्मात्रस्य वस्तुतस्तु हि कर्मोच्यते अतो यदिह जन्मनि दृष्टाभ्यामेकजातीये प्रयत्ने कृते फलावाप्ति
रेकस्यैकस्य नतीन्न नमेकस्य प्राक्तनः पुरुषकारो नास्ति पापरूपो वा स प्रतिबंधक इति कल्प्यते अ
तः सर्वं कर्मापरपर्यायपुरुषकाराधीनमेव अत एवोक्तं भारते स्वकर्मणा मुनेनापि मुनाप्यथवा
जनः फलं तदनुरूपं हि प्राप्नोति भरतर्षभ अत एवोत्तरमीमांसायां कस्यचिद्वर्तमानजन्मनि कर्म
मिः पापक्षये जाते संन्यासो ततो मुक्तिः यत्र तु कर्मस्वकृतेषु संन्यासो ततो मुक्तिस्तत्र पूर्वजन्मार्जिता
निकर्माणि कल्प्यंते अत एव क्षत्रियजनकस्य ज्ञानोत्पत्तिं दृष्ट्वा प्राक्तनः संन्यासोपि कल्प्यत इत्युक्तं अ
तो यत्र लोकतः शास्त्रतो दृढतरः कार्यकारणभावो वगतस्तत्र कार्यं दृष्ट्वा कारणमनुमीयतेति अ
तः सर्वत्र प्राक्तन ऐहिको वा पुरुषकारः कारणमिति अतः पुरु■कार एव राज्ञा कर्तव्य इति स च बला ४६
धीन इत्यवश्यं बलसंग्रहः कार्यः अत्र बलं षड्विधमाह कामंदकः षड्विधं तु बलं व्यूह्य द्विषतोभियु

क्तं व्रजेदिति षड्विधं बलमादाय प्रतस्थे दिग्जिगीषयेति कालिदासोपि तद्भेदा उक्ता नीतिसारे मौलं भृतं
श्रेणि सुहृद्द्विषदाटविकं बलं पूर्वं पूर्वं गरीयस्तु बलानां व्यसनं स्मृतमिति पूर्वपूर्वस्य नाशः कश्चिन इ
त्यर्थः तत्र मौलं नाम परंपरागतं भृतं यावद्विभक्तापि श्रेणिः गमनमार्गे स्थाने स्थाने निवेशितु सु
हृन्मित्रबलं द्विषतां स्वाधीनं यज्जातं तद्विषद्बलं आटविकं अरण्यसंबंधि तत्रैतद्द्वयादौ मौलसाहि
तो गच्छेदित्याह पूर्वकल्पधनिकाले वा गच्छेन्मौलैः समावृतः मौलास्तु दीर्घकालेपि क्षयव्ययसहिष्ण
वः एष्ववस्तुषु मेधावी भृतादीनि विवर्जयेत् दीर्घाध्वकालखिन्नेषु तेषु भेदभयं भवेत् भेदः स्वामिपरित्या
गः एवमन्येषामपि बलानां गुणदोषा ऊहनीयाः तत्र कस्मिन् काले किं बलं ग्राह्यमित्याह कामंदकः
स्फीतसारानुरक्तेन बलेनोपचितः परः तत्तुल्येनैव यातव्यः क्षयव्ययसहिष्णुना कश्चिन्मतमपि ग्रा
ह्यमित्याह स एव प्रभूतं स्वं भृतं वस्तं मौलमल्पमसारवत् अरे वक्ष्यात्मनस्ताद्विपरीतं जयेदरिं
भृतबलेन मौलं रूपादिति विपरीतं श्रेणिबलस्योपयोगमाह स्फुतं श्रेणीबलं शक्यमाधातुं यानिवलं
नि नित्यं प्रयासव्यायासामिति श्रेण्यामस्तु त्यजेत् आसेत्रैपेयोपयोगमाह प्रभूतेनारिसैन्येन
योधयेन्महतोरिपून् अकार्यं तं कापेनयादन्यासैनरिपोर्बलं वा सपत्कर्षयेद्वैतं दुर्गकंटकशोध
नैः आटविकस्योपयोगमाह नित्यमाटविकं सैन्यं दुर्गकंटकशोधनैः परदेशप्रवेशे च पुरः कुर्वी
त पंडित इति पूर्वोक्तं बलस्य चतुरंगतामाह हस्त्यश्वरथपादातं सेनांगस्याच्चतुर्विधमपि अप

गजनीरूपणं चतुर्विधा गजाः भद्रा मंदा मृगा मिश्राश्चेति तल्लक्षणमाह वराहमिहिरः मध्वाभदंताः
सुविभक्तदेहाः न चोपदिग्धा न कृशाः क्षमाश्च गात्रैः समैश्चापसमानवंशा वाराहतुल्यैर्जघनैश्च भद्राः
चापवंशस्य तत्तुल्यपृष्ठा वक्षोपकक्षावलयः श्लथाश्च लंबोदरस्त्वक् बृहती गलश्च स्थूला च कुक्षिः
सहमेचकेन सैंहीवदृक् मंदमतंगजस्य कक्षाग्रिमपादद्वयोक्तसंधिः सैरीस्तिंहस्तदृग्लोविरत्य
र्पः मृगस्तु ह्रस्वाधरबालमेंढ्रास्तान्यंघ्रिकंठद्विजहस्तकर्णः स्थूलेक्षणश्चेति यथोक्तलिंगैः संकीर्ण
नागाव्यातिमिश्रसंज्ञाः मिश्रत्वं भद्रमंदादिसंगेन एवमन्यत्रापि अथ परिमाणमाह पंचोन्नातिस
प्तमृगस्य दैर्घ्यं अष्टौ च हस्ताः भद्रस्य सप्तोन्नातिनवदैर्घ्यं दशापरिणाहाः अन्यास्यष्टं अत्र हस्तास्तेष
ग्यवोदराणीति कल्पनेन कार्यः तेषां मदवर्णमाह स एव भद्रस्य वर्णो हरितो मदश्च मंदस्य हारिद्रकसन्नि
कोशः कृष्णो मृगस्य विहितो मदस्य संकीर्णनागस्य मदो विमिश्रः गजप्रशस्तामाह नाम्नोच्छतान्व
दनाः कलविंकनेत्राः स्निग्धोन्नताग्रदशनाः पृथुलामुतास्याः चापोन्नतायतनिगूढनिमग्नवंशास्तन्वे
करोमचितकूर्मसमानकुंभाः कलविंकश्चटकः तत्तन्येकजातीयानि रोमाणि तैः तथा विस्तीर्णकर्णह
नानिललाटगुह्याः कूर्मोन्नतौ द्विनवविंशतिवानखैर्निकुमौन्नितानि पुष्करं शुंडाग्रं तथा मूलम
ध्यदेशा नागसंस्थिता देवदैत्यमनुजाः क्रमान्नतः दंतभंगफलमत्र दक्षिणे भूपदेशबलविद्रवप
दं वामतः सुतपुरोहितेभयंतहंति साटकदारनायकान् आद्यविकोटयामाधिकृतस्तस्तोहिता दारमा

रकादाराधिकृताः पुरुषास्तान्हंति भयंकरोतीत्यध्याहारः तथा आदिदेशुभयगर्भं दर्शनात्यापि विस्पष्ट
फलं कुलक्षयं सौम्यलग्नतिथिभादित्रिः शुभं वदतेशुभमतेन्यथापरं क्षीरिमिष्टफलपुष्पपादपेश्वाप
गातटविघट्टनेन च वाममध्यरदभंगखंडनं शत्रुनाशकृदतोन्यथापरं वल्मीकस्थाणुगुल्मक्षुपत
रूमथनः स्वेच्छया हृष्टदृष्टिर्यायाद्यात्रानुकूलंत्वलितपदगतिर्वक्त्रमभ्युन्नमय्य चोद्धैः भद्रस्यासन्नारकालेजन
पतिचमुहुः शीकरं प्रेरतेवातत्कालं वामदांतर्जपकदपरदंवष्टयन् दक्षिणं च स्खलितगतिकरस्मा
त्रकरणीतिदिनंश्चासितिमृदुसुदीर्घन्यस्तहस्तः पृथिव्यां मुतसुकुलितदृष्टिः सप्तरात्रीणां विलोनो रूप
कृदहितभक्षी नैकश्च मोत्सक शाकृद्भे आहितभक्षी रोगजनकं तृणादिवक्षी असृक्रुधिरं तत्साहि
तं सकृत् तथा प्रवेशनं वारीणि वारणस्य ग्राहेण ग्रायभवेन्न पस्याग्राहं यही त्योतरणं द्विपे
स्यतो पालकेनेवृद्धिकरं परस्मात् बंधनभमीराहभद्रमंदमृगमिश्रदंतिनांश्चेतरत्र कनकोपमाःस्त
ताः भसयोहिर दपृष्टिवृद्धिपाय भुजामापिपनुः सुरवावहाः शालाआरज्येष्ठाच्च तु विंशतिरेव हस्ता
द्विघ्नितितमध्यजघन्यशालाविस्तारतस्तात्र्गुणश्चदीर्घान्तिं भाश्चविस्तारसमुच्छ्रिताः स्युः एत
च शालास्तंभाः अत्रपवोक्तिपरिमाणं मध्येवहूनां हस्तिनाम संनिवेशनार्थमतिहस्तिपूर्वोक्तास्ताशालो
नेया: स्तंभानां परिमाणमाह ज्येष्ठांगुलानि खलु ... दनाष्टमनुनागनमध्यस्तु पंचेदशाकनकं
गुलोनः स्तंभप्रमाणविभुताः क्रमशोनिषंगाः प्रोक्तांगुलाईमिदशांवहलं ... भेषानिषंग बंधनर

४५ उत्तवः द्वारमाह द्वारोच्छ्रयः कुंजरस्यामतुल्यो विस्तारोस्य त्र्यंशहीनः स एवाहीनोष्टपञ्चात्मषष्ठांशके
न ग्रालाद्वारं प्राग्उदक् प्रशस्तं अयः पुनः आत्मनस्त्र्यंशस्य षष्ठांशेन विस्तारः एवं च द्वारमुपरिस्तम्भ
मधोभागे महत्संपन्नं भवति बंधनार्थवृक्षानाह चंदनार्जुनशिरीषमधुकदेवदारुखारलार्जुनशाल
रोहिणीखदिरचंपकशाकाः स्यंदनश्चसकदंबविशोकाः शीताः शिवाश्च द्विपबंधनार्थमेते द्रुमाः पुष्टि
कराद्विकराद्विपानां स्तंभार्थमन्ये विहिता रवंतः कार्याः प्रशस्ताः गुणसंप्रयुक्ताः तथा पूर्वोत्तरमुखो नि
वध्यते यः क्षिप्रं स करोति विक्रमाशत्रुः समरे भिनि जितो दीर्घं चापुरवाप्नुयाद् गजः उदङ्मुखो बध्यमुपै
ति नागो योऽर्थस्य वृद्धिं स करोति भर्तुः प्राप्नोति पुष्टिं चिरजीवितांश्च संग्रामकाले ऽपराजयं वेति अ
न्यादिङ्मुखे निषेमाह दक्षिणास्यवदनस्य च बंधो जीवितनाशकरो द्विरदः स्यात् पश्चान्मुखो बंध
स्तं नमानमाह दिग्भ्रमेणान्यां बंधनार्थं द्विपानां स्तं नो राज्ञः श्रेयसे दंतिनश्चौति अन्यादिग्स्थानिषं त
त्पार्श्व एमाह ज्येष्ठो दंष्ट्रो मौनवमध्यमश्चस्तनोष्टहस्ताः कुपितः कनीयान् सर्वे निरवताश्च
तुरश्चहस्ता मानाधिको नाश्च शिवापनस्तु गजानां प्रदर्शनकल्पोपयानि तु हस्ती चिकित्सायां
दृष्टव्यानीति नेह प्रपंचितानि इति सपरिकर गजलक्षणनिरूपणं अथाश्वलक्षणमुक्तं योगयात्रायां दी
र्घग्रीवाक्षिकूटस्त्रिकहृदयपृथुस्ताम्रताल्वोष्ठजिह्वः सूक्ष्मत्वक्केशवालः सुशफगतिमुखो ह्रस्वक
र्णोष्ठपुच्छः जंघाजानूरुवृत्तः सितसितदशनश्चारुसंस्थानरूपो वाजी सर्वांगशुद्धो भवति नरपतेः ४५

शत्रुनाशाय नित्यं ककुटं ललाटोर्ध्वभागः त्रिकं कटिप्रदेशः केशाः शरीरस्थिता वालाः ग्रीवापुच्छगताः गो
वलीवर्दन्यायेन पृथग्ग्रहणं जंघायां जानुनी वृत्तः मंडलाकारः समानिम्नोन्नतत्वरहितास्सिताः
श्वेताः इष्टनिष्टमाह उत्सर्गनिष्ठुरचंदमाससना पश्चाद्वामेचज्वलनं ततो पुरत्रशस्त्रं सर्वांगज्वलन
मष्टद्धिदंतपानां द्वे वर्षे दहनकरणाश्च धूपनं च अतः पुरं नाशमुपेतु मद्रेकोशः क्षयं यातु दंत्र दी
पो ऽपस्यपापोचपराजयः स्याद्रक्तोज्ञमांगज्वलनेजपश्च स्कंधासनांसज्वलनं जयाय वधायपश्चादज्व
लनं प्रदिष्टं ललाटवक्षोक्षिभुजेच भस्मः पराभवाय ज्वलनं जयाय। प्रदेशोपवसानस्तां पतनं क्वेदो
निमित्तादिना कंपो वा वदनाच्छुरज्ज पतनं धमस्य वा संभवः अस्त्वप्रश्न विरोधतानिशादिवानिद्रालस्यध्या
नतासादो धोमुखता विचेष्टितामिदं नष्टं स्मृतं वाजिनां हेषितपरीक्षामाह मिहिरः क्रौंचवद्रिपुवधाय
हेषितं ग्रीवया त्वचलया च सोन्मुखं स्निग्धमुच्चमनुनादिहृष्टवद्ग्रासरुद्धवदनैश्च वाजिनिः पूर्णपात्र
दधिविप्रदेवतागंधपुष्पफलकांचनादिवा द्रव्यमिष्टमथवा परं नवेद्धेषतां यदि समीपतो जयः वामैश्चापा
दैरभिताडयंतो महीं प्रवासाय नवंति भर्तुः संध्यासु दीप्तामवलोकयंतो हेषंति वेद्धंधुपराजयाय
आरोहती क्षितिपतौ विनयोपपन्नो यात्रानुगोन्यतुरगं प्रतिहेषितं च वक्रेण स्पृशति दक्षिणमात्मपा
र्श्वं योश्वः समन्तरचिरात्प्रकरोति लक्ष्मी मुहुर्मुहुर्मूत्रशकृत्करोति नडमानोपनुलोमयायी अ
कार्यभीतोश्रुविलोचनश्च शिवं न भर्तुस्तुरगोभिधत्ते रथपति लक्षणं लोकतएव ज्ञेयं इत्यश्वादिल

दारां अथाभियोज्यनृपाः योग्यायात्रायां शाखयातेषु हरस्पिशिवागर्दनघानतु ल्यंत्यक्तस्नेहाः परिजन
सुहृत्त्वाहनोपस्कंरेषु कष्टंकोनः शर एणमितिवावादिनो यस्यसैन्यविद्विष्टावाप्रचुरपुरुषाः सोभियो
ज्योरूपेण कापोतकेलकमधूनिबस्यसंमाश्रयंते ध्वजचामराणि छत्रायुधादीनि च जानियोज्याय
स्या यवानाहतत्पर्यग्राहः प्रतिपरत्वंसरितामिषोश्च गोषो यवागोष्पज लानापानां अबारिदेशेस
ति तत्र वृक्षेरुद्दे कृतं वापुसुतरुछिन्नावा भंगपातचलनान्यानिमित्तं दरोदनानि चसुरप्रतिमानां अग्नि
रूपमनलेनवि नीनिश्चलानि च यदाप्रज्वलंति प्रस्तातिवैधत्यमको चतुष्पाएवरएवसत्वस्यपुरुषवे
मः प्रदोषकालेककवाकुरावद्वाहिमाग मेवान्यभृतप्रलापः अन्यभृत कोकिलः दीर्घदीनंसह तासा
स्मिपाकोपस्तंलु चैनित्यमेवान्ततोच हन्युपो वायो षितोनिर्घएणश्चेतः काकोनकमिद्राध्युधंचअ
नृतौ शरत्कालादन्यत्रअनतावर्ती द्वाधुधेप्यन्वेतिअहान्तिरिक्तः पवनोतिचंडोगंधवसंज्ञस्यभवे
तुरस्यपतन्ति नवै ब्राहानितरकाणंनक्तंचतारगणसंप्रलगमः एवांतितधान्नियोज्याः इति येन
देशाः नीतिसारे भेदंकुर्वीतयलेन मंत्र्यमात्यपुरोधसां तेषु भिन्नेषु भेदो हि युवराजेतयोजितेअ
मात्यो युवराजश्च भुजावेतौमहीपतेः मंत्रीनेत्रेहि भिन्ने तो भिन्नेकेस्मिन्नपितद्विषः सर्वावस्थां हि मे
धावी नकुलीनं विकारयेत् तत्रोपजापः कर्तव्योयःकोपोनुग्रहःक्षमः आगतान्पूजयेत्स्वामी न्निजा
श्चपारसीत्यजेत् भेदंकुर्वीतमतिमान्निस्पृहोतो बलावसा दंडेनाहस्माहन्यामितिवारेःसंहतेबलं ४९

भिन्नं हि तत्काष्टमिवजंतुजग्धंविशीर्यते इतिभेदं नृपः कुलाततनोपायादिस्योःपुरमितिएवंसाम
दानभयादिनाभेदं कुर्वीतेत्यर्थः अथदूतमेवएमाहकामंदकः पातव्यापत्राहितुपादूतं दूत्याग्निमा
निनं तावविशिनष्टि प्रगल्भः स्मृतिमान्वाग्मीशास्त्रेचास्त्रेचनिष्ठितः अभ्यास कर्मा भूरितो दूतो भवितु
मर्हति तत्रैवविधमाह निःशक्तार्थोमितार्थश्च तथा शासनवाहकः तत्रयो क्लिष्टो तमेवदेशकालोवितंयथ
योग्यमन्यस्याग्रेव ददाति सनिःसृष्टार्थः यथापांडवानांदूतेवासुदेवः यावत्संदिष्टवक्तामितार्थः शा
सनहारः प्रसिद्धः कृतं प्रत्याहनाविज्ञातपुरे राज्ञा प्रविशेच्चनसंसदिकालमीक्षेत कार्यपरमिनुज्ञा
तश्चनिष्पतेत तन्निष्पतेदुपाविशेत् तस्माश्वतत्राचराद्वसयुगे तज्ञानमेवचाद्विष्टं राज्ञोविजानीयात्को
शमित्रबलानिच उद्यतेष्वपिशस्त्रेषु यथोक्तंशासनंवदेत् रागापरागौजानीयात् कोशमित्र
बलानिच उद्यतेष्वपिशस्त्रेषु यथोक्तं शासनंवदेत् रागापरागौजानीयात्प्रकृतीनां च भर्तरि
मलेननाशीद्रव्येण कर्मणा च महीयसा कुर्याच्चतुर्विधंस्नोत्रं पक्षयोरुभयोरपि तीर्थाश्रमसुर
स्थाने शास्त्रविज्ञानहेतुना तपात्वेजनोपेतैःस्वचरैः सहसंवदेत् प्रतापंकुलमैश्वर्यंत्यागं
मुत्थानसौष्ठवं अक्षुद्रतां च दाक्ष्यंच भर्तुःसर्वत्रकीर्तयेत् हेसंता संहितानिष्टवचनं कामंक्रो
धं च वर्जयेत् वै तस्मीमाश्रयेद्वृत्तिनान्यद्गाश्रितां सदा नान्यं ग्रपेत्राभवस्त्वं वदीद्धिं घात्परस्य
च भावं तर्गतिं उपंगुत्तोमत्तश्चभाषते तस्मादेकः स्वपन्नित्यंस्त्रीमद्येवविवर्जयेत् राष्ट्रात्

यंतपालानां आत्मसात्करणं तथा युद्धाय प्रस्तारमत्तो नेष्टुत कर्मेति कथ्यते धूर्तेनैव नरेंद्रस्तु कुर्वीत
रिविमर्शणं स्वपक्षे विविजानीयात् परदूतविचेष्टितं इदं कर्म निसृष्टार्थस्यैव चराश्च का नीतिसारे तपस्वि
लिंगिनो धूर्ताः पिण्याशल्योपजीविनः चरास्चरेयुः परितः पिबंतो जगतां मनः निर्गछेयुर्विशेयुश्च सर्वदा
नाविदोत्वहं सूक्ष्मनुत्तं हि चारेण परस्परद्विविधचेष्टितं स्वपक्षे परपक्षे जागर्ति वाडवत् महीपतिः विवस्वा
निव तेजोभिर्जनस्थानि विचेष्टितैः राजा वरे जगत्कृत्स्नं व्याप्नुयाल्लोकसंमतैः एते ज्ञेयास्तु संचाराः
सर्वनान्योन्यवेदिनः प्रकाशश्चाप्रकाशश्च चरस्तु द्विविधः स्मृतः अप्रकाशोयमुद्दिष्टः प्रकाशो दूतउच्य
ते तथा जडमूकांधबधिरछद्मानः पंडकास्तथा किराता वामनाः कुब्जास्तद्विधायेच कारवः भिक्षुकाश्चा
रणा दास्या नानाकायविकलाविदः अंतःपुरगता वार्ता आहरेयुः पुरालिता छत्रव्यंजनभृंगारस्नान
वाहनधारणं महावातविहितानि विधुरन्ये च संगताः सदा व्यंजनकर्तारः केल्पकाः स्नाचिकास्त
प प्रसाधकाभोजकाश्च गात्रसंवाहका अपि जलतांबूलकुसुमगंधसंपन्नदायकाः कर्तव्यावरा
गा येते ये चान्येप्यासवर्तिनः इति दूतचारप्रपंचः अथ प्रयाणयोधस्वरूपमाह वराहमिहिरः सूरकृ
ता स्त्रमराः कुलजाताः स्वामिहिता बलिनः कृतयत्नाः दृष्टगुणा बहुबांधवमित्रा नागकवेष्टभुजा
कविनाम्ना घ्रमरेश्वरगोष्टषनादाः स्पनदष्टाः शुकसन्निभनासाः कुंकुमराजिनिमीलितने
त्राः उन्नतकंधरमस्तकहासाः दंष्ट्रागौरा प्राप्तिताश्च पुरोणं गास्तिबहवोयुज्जलकर्णलक्ष्याः का

कर्तोत्कुटीकृतवक्त्राधर्ममतो विविधायुधहस्ताः अथ प्रयाणे विशेषयोगपात्रायां अंतःपुराद्वा
स्थनिवेशनाद्वासिंहासनाद्भिपस्तिशाद्वा कुर्यान्निरेंद्रः प्रथमं प्रयाणं विप्रैः स्नातोग्रैः कृतमंगलाशीः द्वि
जो विष्णुक्रमाद्यं मंत्रेणानेन दापयेत् इदं विष्णुर्विचक्रमे इति पादं समुद्धरेत् अमुकस्य वधाय दि
द्विषं क्षितिशोन्यसेत् मंगलानि ततः पश्यन् स्त्रानृपश्चैवं नरनृपो व्रजेत् अथ दर्शनीयानि शाकुनेव
राहमिहिरः वाचः शुभाः स्नारस्तचाषबर्हिणः कादंबहंसाश्च सजीवकाः का कच्छपकात्कव नातपृष्ठ
गोश्रीवृक्षबालव्यजनानि चंदनं दधिमधु घृतरोचनाकुमारि ध्वजकनकांबुजभद्रपीठासिंहासि
स्तितवृषकुसुमं वराणि मीनद्विजगणिका भजनाश्च चारुवेषाः ज्वलिताग्निखिफला क्षतेक्षुभ
क्ष्यद्विरदमृदंकुशचामरायुधानि मरकतकुरुविंदपद्मरागाः स्फटिकमणिप्रमुखाश्च रत्नभेदाः
स्वयमेव परविमान्यपलतोषाद्यदिकल्पितानि भवंति मंगलानि सज्जयति सकलं ततो धरित्रीं गृहणद
गालभनक्षुतं रूपास्यं इदं मंगलं ग्राह्यं दुष्टवंसंस्पृष्टवं चेत्पथः अनिष्टफलान्युक्तानि ते नैव कार्या
सौषधकृष्णधान्यलवणक्लीवास्थितैलं वृषायं कांगार गुडाहि चक्रं शकृतः केशायतं धिताः वांतोन्म
त्तजडेंधनास्तृणतुषक्षुत्क्षामतक्रारयो मुंडाभ्यक्तविमुक्तकेशपतिताः काषायिणश्चाशुभाः पान
दिने क्षीराश्ममगवजनं तु ज्योतिःशास्त्रे ज्ञेयं एवं मंगलामंगलभिन्नदर्शनानि निषिद्धानापीष्टलानिद्रति
ज्ञेयं देशविशेषे विशेषमाह कुक्कुटारिभकारिकाशिवाचस्पारवापिंगलिकान्यपुष्टामावाः प्रशस्ता

४८ गृहे गोधिका च पुंसं ज्ञका येव पतत्रि एण्श्च तथास्येनोक्तं ढः पूर्णकूटः कपिंज्ञश्रीकर्णच्छिकार कपिश्च
काजाः नैऋत्ये संनिमापे च विस्थिद्विपौ च वामे हिता दक्षिणे भागसंस्थाः आस्फोटितावेडिते संखतूर्य
पुण्याह वेदध्वनिगीतशब्दाः वामाप्रयाणे शुभदा नराणां आक्रंदितं दक्षिणतः परेषां आस्फोटनेमंदम्
धुधुं आह्वानेडितं तस्तवशब्दः भारद्वाजपवज्रबर्हि चाषनकुलाः संकीर्तनाद् दर्शनात् क्रोशतः शुभप्रदा
न सर्पदृष्टः शिवायक्कचित् गोधाशूकरजाहकाहिवराकाः पापारुजाती कृने धन्यं कीर्तनमहन्
वारस्फलं तद्य त्वपाश्च मनने नकुलस्य मृगस्य पक्षिणां चापोदक्षिणे भागस्ति च नेशुभद श्वशृगा
लवनेषु कुक्कुराः रातप्रतोस्तमये च दक्षिणे क्वचिदपवादमाह निरूपहतमनोज्ञवृक्षसंस्थाः शु
चिरुचिरंवनिसस्थसंस्थिताश्च शुभातिप्रदिवसर्क्षलग्नकाले अशुभं तोपि शुभप्रदः प्रदिष्टः
प्रभग्नशुष्कद्रुमकंटकेषु श्मशानभस्मास्थितुषाकुलेषु प्राकारभग्नालयदर्दरेषु सौम्योपिपा
पः शकुनः प्रकल्प्यः तथाहुर्द्वात्रिंशद्गाद् इतभीतमत्तवैराहयुद्धामिषकांक्षिणश्च सीमांतनयंत
रिताश्च सर्वे ना चिंतनीयाः सदसत्फलेषु इति प्राणि शकुनः आप्याणिनः स एव रिक्तो नुकूलः प्रा
कलशो जलार्थमभ्युद्यतः स्त्रियः प्रयाणे विधार्पितो चौर्यसमुद्भिवानां वाणिक्रियाभ्युद्यमिना
मतीनां विशेषमाह यानं धुरंगरहितं वृहतीच कृत्स्नगर्भेण चातिमहतो पुरतः स्थिता स्त्री आगच्छ ४८
ति पृष्ठलिंग रुदितं वाक्ति मर्ध्यशब्दः स्थिरश्च गमनं प्रतिषेधयंति क्षुते आह सर्वत्र पापं क्षुतमुद्दिष्टं

ति गोस्तु क्षुतं मंगलकं प्रियासो मार्जार एव सत्वतनं च पाठवत्रिसपमंगलश्च नुगोभनाय तथा द्रव्याणि शुक्ला
नि तुरंगमश्च पूर्वेण्याम्नेन राववंच मांसं पश्चात् कुमारी दधि चातिशस्तं सौम्येन गोब्राह्मणसाधवश्च त
था काकः शुभो दक्षिणे तस्मात् कुमारी दधि चातिशस्तं सौम्येन गोब्राह्मणसाधवः तेषामन्येषु नेत्रे शुचि
पर्ययेन एप पूर्वदेशे दक्षिणे काकः शुभः अन्यस्मिन्वाम इत्यर्थः तथा क्रोशाद् ऊर्ध्वं शकुनो विफलं
निष्फलं प्राहुरेके तत्रान्निषेधप्रथमशकुनं मानये त्वंचषट् च विज्ञोपामान्तपतिरशुभेषोडशे वाद्वि
तीये प्रत्यागच्छ भवनमिति यद्यानिष्टस्तृतीयः प्रयाणे प्रथमं यत्र शकुनं जातं तन्नैव स्थित्वा एकादश
प्राणानतिवाहयेत् पुनः प्रस्थानेयद्य शकुनंततः षोडशततोप्य शकुने गृहे आगमनं एवं कुशना
निग्रहबलादीनिवीक्ष्य राजा स्वयं यायात् स्वस्यग्रहाद्यनुकूल्याभावे तदुक्तं परास्थिनमसंज्ञपा
पं प्रेषयेत् यथोक्तं योगयात्रायां शत्रुर्विधाय शचिवं शुभदैव युक्तं आज्ञापयेन्नृपतिरात्मनि दैव
हीने इति ग्रहाद्यानुकूल्यं ज्योतिःशास्त्रादवगंतव्यं अथ स्कंधावारस्थानं नीतिसारे पापादिरिपुना
म्यादेशे भूभागे भूभागे साधुसंमते स्कंधावारविशेषज्ञः स्कंधावारं निवेशयेत् मध्यदेशे समध्या
दगारमुपकल्पयेत् उपांतं च पुराकारं महाद्वीपस्तमावृतं पालिशाहेणभुक्तं चरप्यपतिसमा
वृतं तन्मध्ये मानसाल्लादिमहन्मौलबलावृतौ अंतःकोशागृहोपेतं कारयेद्राजमंदिरं मौल
भृतश्रेणिसुहृद्द्विषदाटविकं बलं राजहर्म्यं समावृत्य क्रमेण विनिवेशयेत् हस्तिनो लब्धनामान

५० सुरंगास्तु मनोजवाः गृहोपकंठे नृपतेर्वसेयुः स्वाप्तरक्षिता सुहृद्योग्यो महामंत्री सन्नद्धसाध्वधिष्ठितः
तिष्ठेन्नृपतेर्द्वारि वेगवांश्चतुरंगमः निशि नान्यो बहिर्गच्छेद्द्वारि वारित ततः परं सज्जायकरणं नित्ये
त्सर्वः कार्योन्मुखो जनः तथा बहिश्चखातान्कंछन्नान् तृणैरुपरिसंवृतान् परसैन्यविघातार्थं सर्वो
भूमिं विनाशयेत् केचित्कंटकशाखाभिः क्वचित्कीलैरयोमुखैः दूषयेत्परतोमार्गमुपधादकैरपि निम्न
ढश्चपपाषाणं स्थाणुवल्मीकनिहतान् उन्नममध्यममभेदास्त्रैवा यस्मिन्देशेऽल्पकालं सैन्यबाधा
मभंसयः परस्याविपरीताश्च स्मृतो देशः स उत्तमः आत्मनश्च परेषां च तुल्यबाधामभंसयः यत्र म
ध्यमे त्विहोदेशः शास्त्रार्थचिंतकैः अरातिसैन्यबाधायामसुपयार्तमहीतलः आत्मनो विपरीतश्च
सर्वदेशोऽधमः स्मृतः स्कंधावारं विचिनाद्धि कम्पंदकः दिव्यांतरिक्षैः क्षत्यापि वैश्याप्य दूषितः निचैः
प्रवृत्तपवनो भूगाजीत तनमंगलः हृष्टपुष्टजनः साधुः सुगंधिज्वलिताननः इत्यादिलक्षणोपेतः स्कंध
वारः प्रशस्यते शस्तोऽस्मिन्द्विविधो भंगो ज्ञेयोऽन्यस्मिन्विपर्ययः शकुनाद्युपेतो जयो शकुनाद्युपेते भं
ग इत्यर्थः सेनापतिः कोनीतिसारे कुलोजतजानपदं मंत्रज्ञं मंत्रिसंमतं दंडनीतेः प्रयोक्तारं अ
व्येतारं नयलतः प्रभावोत्साहसंपन्नमाजीव्यमनुजीविनां नित्याकारणवैराणामकर्तारमना
विलं युतानुबंधिकर्माणमत्यामित्रबहुश्रुतं गजाश्वरथचर्यासु शिक्षितं त्यागिनं समरे युद्धभू
मिविभागज्ञं सिंहवज्रद्धविक्रमं अदीर्घसूत्रं निस्तंद्रममर्षणसमुद्धतं हस्त्यश्वरथशस्त्राणां सम्यक् ५०

वक्षणवेदिनं देशभाषास्वभावज्ञं लिपिज्ञं सुदृढं स्मृतं निशाप्रचारकुशलं कुशलज्ञाननिश्चितं दृष्टि
मार्गविज्ञानसंपन्नं तद्दत्तसेवितं क्षुत्पीपासाश्रमत्रासशीतवातोष्णसहिष्णुः आनाहितभयाल्लानिशा
नुपक्षभयावहं भेत्तारं परसैन्यानां दुःसाध्याहितनिश्चयं भग्नानां च स्वसैन्यानां अवष्टंभस्य कारकं
वरदृतप्रचारज्ञं प्रहारं भकलोपमं शश्वत्संस्निद्धकर्माणं सिद्धिः क्रमनिषेवितं इत्यादिलक्षणोपे
तं कुर्वीत ध्वजिनीपतिं तस्य कृत्यमुक्तं ध्वजिनीं च सदोद्युक्तः संगोपायेद्दिवानिशं नद्यद्रिवनदुर्गेषु
यत्र यत्र भयं भवेत् सेनापतिस्तत्र तत्र गच्छेद्व्यूहकृतैर्बलैः व्यूहास्तु मकरश्येनशूचीशकटवज्रस
र्वतोभद्रभेदात्षोढा तेषां विनियोगश्चोक्तो महाभारते यायाद्व्यूहेन महता मकरेण पुरो भये श्ये
नेनोभयपक्षेण सूच्या वा धारवक्रया पश्चाद्भये तु शकटं पार्श्वयोर्वज्रसंज्ञितं अन्ये च गरु
डादयो व्यूहभेदा नोक्ता तेषामेषेवांतर्भावात् सर्वतः सर्वतोभद्रं भये व्यूहं प्रकल्पयेत् यच
नोक्तं नीतिसारे नायकः पुरतो यायात् प्रवीरपुरुषावृतः मध्ये कलत्रं कोशश्च स्वामी फल्गु च
यद्धनं नायकः सेनापतिः फल्गु अत्रादितं दुर्बलं प्रयामित्यर्थः पार्श्वयोरुभयोरश्वा वाजिनां पार्श्वयो
रथा रथानां पार्श्वयोर्नागा नागानां चाटवीबलं पश्चात्सेनापतिः सर्वं पुरस्कृत्य कृती व्रजेत् यायात्सन्नरुद्धैन्यो
खिन्नांश्चाश्वासयन् परं एवं सेनापतेरग्रे यानमुक्तं अधुना पश्चाद्यानं अतो ज्ञायते अग्निपातापश्चा
द्याता चेति सेनापतिद्वयमिति शतसेनापति व्यूहानिरूपणं अथ कूटयुद्धेन शत्रुमारणसमयः

५१ क्तो नीतिसारे दीर्घाध्वनि परिश्रान्तं क्षुत्पिपासाहितश्रमं व्याधिदुर्भिक्षमरकैः पीडितं दस्युविद्रुतं घो
राग्निभयवित्रस्तं दृष्ट्वा तत्समाहितं पङ्कपांसुजलस्कन्धं व्यस्तं श्वासातुरं तथा प्रसुप्तं भोजने व्यग्र
मभूमिष्ठमसंस्थितं एवमादिषु जातेषु व्यसनेन समाकुलं स्वसैन्यं साधु रक्षेत परसैन्यं च घात
येत् विशिष्टो देशकालाभ्यां भुक्तः प्रकृतिभिर्बलैः कुपात्रिकान्वाप्युच्चैः कूटयुद्धविपर्यये कूट
युद्धं नाम विद्याकृच्छास्त्रादिना घातनं लोके प्रसिद्धं किंचिदुक्तं नीतिसारे पुरस्ताद्विषमे देशेऽपि
ह्याद्धन्यात्तु वेगवान् जितमेवं व्यनिम्बस्तं हन्याच्छत्रुं व्यपाश्रितः विलोभ्यापि परानीकमप्रम
त्तो विनाशयेत् अक्लक्लेरस्तापाद्रात्रौ प्रजागरकृधमं दिवासुप्तमाहन्यान्निद्राव्याकुलसैनि
कं प्रातःसंगवसैन्यद्धमपरान्हे विनाशयेत् निशि विस्रान्तसंसुप्तं तत्स्नौतिकविधानवित् इत्य
वं कूटयुद्धेन हन्याच्छत्रून्न लघुत्वितः वर्धते मंत्रमित्यादि सत्रवस्तु प्रकीर्तितिः अश्वत्थाम्नोऽपि जलीपा
तानयमार्गकृविशारदः साधु प्रमत्तं व्यवसायवत् येन प्रकारेण परं निःहन्यात् चरैः समावेदितत
त्प्रचारः शंकेत तेनैव ततोऽप्रमत्तः नित्यमिति नित्यात्कूटयुद्धेषु शत्रुं न हि तिरपाति धर्मं च येनाऽत्रु
न्नाशः अश्वत्थामेव सुप्तं पांडवानामनीकं निशि सुनिशातशस्त्रो द्रोणसूनुर्जघान अत्र ब्राह्म ५१
णं वेजं हन्यात् ब्राह्मणं तु स्वस्य वधाप्युमायां तं निवारयेत् यदा निवारयेमपि कर्तुं मन्यत्कस्तादो
हन्यादेव यथाह मनुः गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतं आततायिनमायान्तं हन्यादेवाविचारयन्

नाततायिवधे दोषो हन्तुर्भवति कश्चनेति कात्यायनोऽपि आततायिनमायान्तमपि वेदान्तगं रणे जिघां
संतं जिघांसितं जातेन ब्रह्महा न वेद्भवति अतो जिघांसन् एव विप्रस्य मारणं न तु सत्त्वादेः अत्र विज्ञानेश्व
रः मनुवाक्ये वा शब्दात्कात्यायनवाक्ये अपि शब्दात्ब्राह्मणवधे तात्पर्यं किं त्वेतादृशे ब्राह्मणेऽपि वध्यः किं
मुतान्य इति कैमुतिकन्यायेन तादृशान्यवधपरमित्याह वस्तुतः अनेन दोषमाह उद्यम्य शस्त्रमायान्तं भ्रू
णमप्याततायिनं निहत्य भ्रूणहा तस्मादहत्वा भ्रूणहा भवेदिह आत्मघाती भवेदित्यर्थः बृहस्पति
रपि स्वाध्यायिनं कुले जातं यो हन्यादाततायिनं अहत्वा भ्रूणहा स स्यान्न हत्वा भ्रूणहा भवेदिति
सवत एवात्मानं गोपायेदिति श्रुतिरपि अतः स्ववधार्थमागच्छन् ब्राह्मणो वध्यः परवधार्थं गच्छन् स्वयं न
वध्य इति तात्पर्यं एतत्परमेव बार्हस्पत्यं आततायिनमुत्कृष्टं वृत्तस्वाध्यायसंयुतं यो न हन्याद्वधप्राप्तं सो
ऽश्वमेधफलं लभेदिति एवमेव चन्द्रिकाशयः यत्तु धृष्टद्युम्नस्य द्रोणवधे कुलक्षयं कृतेन तद्ब्राह्मणवध
निमित्तमेवाकिंतु न्यस्तशस्त्रवधनिमित्तं तादृशस्य ब्राह्मणस्य वधे न्यायपक्षपाददोषाप्तिस्यात् प्रजा
पीडनमुक्तं भारते उपरुन्धन्ति राजानो भूतानि विविधानि च तद्वत् विजयं प्राप्य वर्धयन्ति पुनः प्रजाः
तथा तावद्बलेनाऽपीडयेच्च शत्रोः प्रकृतयः स्वयं वशं जाते पुनस्तास्तु पितृवद्वृत्तिमाचरेत् अथ धर्म
र्ममाह मनुः समोत्तमाधमैराजा त्वाहूतः पालयन् प्रजाः विनिवर्तेत संग्रामात् क्षात्रं धर्ममनुस्मरन्
तथा आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः योधान्

५२ प्रकृतस्तु पदे त्र्यक्षो वराहमिहिरेण अभिज्ञनयुतामयं यो यं जनाक्रूपयति बोधनु जिपरत्रौ सत्क्यांचक्रेत
पैवकृतश्रमाः मपि च भवतामक्तिस्ने त्वरूपं नजयो मम मेधिरूदं तु रक्षस्पाद्याक्रांतं नवद्भिरिदं यथा तथा पुराणे
पदे मोक्षतान्वर्तयेत् तपो हि ज्योतिष्टोमादियज्ञैः स्वर्गाद्याप्तिस्तत्र च ज्ञानाद्यनेकसाधनं महत्कष्टाया
ससाध्यं तपो पासनाद्यपि चास्मादितपस्तु च लोके स्वर्गादिकं स्पष्टमेव योगोपि वायुनिरोधो नाहारनिद्राव्याप
मानिरोधनादिना दुःसाध्य एव सर्वत्र च कीर्तनं कृते पुण्य पक्षः अतः सर्वापेक्षया रणे मरणमेव स्वल्पा
यासमसाध्यसाधीयः तत्र हि पापिनामपि स्वर्गः किमु तान्यस्य तदुक्तं योगयात्रायां द्वैपायनेन मुनिना मनु
ना च धर्मयुद्धेषु येनिगदिता विदितास्तु तेषां स्वाम्यपर्गो द्विजा हि ते त्यजतां शरीरं लोकाभवति सुजना
विपुलं यशश्च तपस्विभिर्यस्तु चिरेण लभ्यते प्रयत्नतः सत्त्रिभिरिष्टया च व्रजंति तां गतिमनस्वि
नो रणेश्वमेधे यश्च यतामुपागता स्वर्गस्य मार्गा बहवः प्रदिष्टाः स्तोकं च साध्याः कुटिलाः सविघ्नाः निमेष
मात्रेण महाफलाय मजुश्च पंथाः समरे व्यसुत्वमित्यपि तथा संरक्षमाणमपि नाशमुपैत्यवश्यं एत
च्छरीरमवहाय स्तु हत्वा तथापि तत्किं वरं प्रलुपता सुदृढां समक्षां कीर्तिं घ्नतः पर बलं भृकुटीमुखस्य
हातान्मातेति च वेदनार्तः किं रंकमकुनमृत्रककफान्तु लिप्तः वरं मृतः किं भवने किमाजौ सदृशदं ५२
तवदंभीमवक्रः तथा यस्य तपो न जना कृपयति नो मरणं समरे विजानं वा न श्रुतदानमहाधनता
वा तस्य भवः कृमिकीटसमानः लोकोस्तु भक्तिषु तु तावदन्यः परा सुखानां समृद्धपुंसां पल्योपितेषां

न हियासुखानि सुरस्तनीनामवलोकयंति शत्रुसैन्यमवदार्य वर्त्ततां पत्युरखंतु रूपयामितादनं स्व
एवतां स्वपचरसोपपन्नवारहंदिग्वधूवदनकर्मपूरकान् निपतति निजस्सिद्धियस्य सिंहरुस्तु तनुस्थाता
धिकमांसराशिम त्तिः पिबति च तदसृक्शुदेष्टगंधं वदनग्रंतां श्वचरानैः प्रमज्य सुकान् भारते इंद्रांब
रिषसंवादे इंद्र उवाच संक्षिप्तेन रणे वर्णं न कृत्वा तन्म ध्येयं मृतस्य फलमाह भर्तुरर्थं तु यः शूरो विक्रमे
द्वाहिनीमुखे भयान्न विनिवर्तेत तस्य लोका यथा मम यश्च शूरो वृक्षते कंचित्सहायं विजये स्थितः
जीवग्राहं प्रगृह्णाति तस्य लोका यथा मम आहवे निहतं शूरं न शोचेत कदाचन अशोच्यो हि ह
ते शूरः स्वर्गलोके महीयते न चान्नं नोदकं तस्य न स्नानं नाप्यशौचकं हतस्य कर्तुमिच्छंति तस्य लोकां
न मे श्रृणु मे वराप्सरसां सहस्त्राणि शूरमायोधने हतं त्वरमाणाः प्रधावंति मम भर्ता भवेदिति एत
त्तपश्च पुण्यं च धर्मश्चैव सनातनः चत्वार आश्रमास्तस्य यो युद्धे न पलायते तथा न हि शौर्यात्परं
किंचित्त्रिषु लोकेषु विद्यते शूरः सर्वं पालयति सर्वं शूरे प्रतिष्ठितं चराणामचरा अन्नमदंष्ट्रा दंष्ट्रिणामपि अ
पाणयः पाणिमतामन्नं शूरस्य कातरा समानपृष्ठोदरपाणिपादाः पश्चाच्छूरं भीरवो नु व्रजंति अ
तो नपाताः प्रतिपत्य भयः कृतांजलीमुपतिष्ठंति शूराः योग्ययात्रायामपि किंचिन्मुकुलबाहुपंज
रैः हाराग्रकृष्ट प्रवरकपीडनं रमयंति विमानसंस्थिता सुरवधूगतिसुदारिणश्चेतान् एकतोस्य
सुरसुंदरीजनः आपतत्यतिसुयुत्सतोन्यतः पाप्मना सह पलायते यतः शोकतः कुलकलंककारकं

तथाचत्रैकिमस्मिन्वदनास्रद्रुसंवापत्न्यामिनोपेगिरण्यंतिनास्तन्नउद्धात्नरणेष्टोविदितोरिमध्येयद्वालि
त्रास्तिछतिसाहसंततनकेवलंगात्रविभूषणानि क्षतानिशस्त्रस्पर्शेनकृतानि यत्रास्तरोमूलिकाविक्षता
नितान्येववंशस्यविभूषणानि भंगेजातेप्रसादंतौफलातित्रापस्तत्रैवश्रेष्ठयोधेषुवपर्यंत्रस्त्राण्याजौ
प्रवृत्ताव्यसनःकृतापे उद्धानिनावाजिकृताध्वलोकस्तेषांविमानान्यवलोकयंति अश्वमेधप्राप्त
लोकेभ्योप्युत्तमंलोकंयांतीत्यर्थः येरश्वमेधोविहितःफलंवदंवैबुद्धिज्ञैर्वाश्रुतिशास्त्रकारैः तैरेवमं
गेप्रतिलोमगस्यपदेपदेवाजिमखःप्रादिष्टःसमृद्धिं तंसंयुगस्तंप्रहारैःपरस्परतिस्तुप्रप्राजिबुद्धन्तुल्यं
आत्मानमंकेषुसुरांगनानांमंदाकिनीमारुतवीजितांगाः यत्तुपराशरवचनं द्वाविमौपुरुषौलोके
सूर्यमंडलभेदिनौ परिव्राड्योगयुक्तश्चरणेचाभिमुखंहतइतितत्रपरिव्राजणत्तस्यापिमोक्ष
इतिकेचित्वाचक्षते युक्तंतुतमेवविदित्वातिमृत्युमेतीत्यादिभिःश्रुतिभिर्मोक्षंप्रतिसाधानत्वावगमा
द्रणस्यचज्ञानसाधनत्वाभावेनज्ञानानुत्पत्तेर्नमोक्षइति यत्तुवचनंनतद्साधारत्वेनरणस्यमो
क्षफलंब्रवीतियोगयुक्तइतिपदंयोगेजातज्ञानोक्तेः प्राक्स्वतस्ययेलोकासोरणेमृतस्यभवतीत्येत ५३
संस्तवेनाप्युपपन्नंनरणमरणस्यमोक्षसाधनत्वंगमपतियोगस्यतुउक्तहितुत्वमेतेनयोगःप्रयुक्तइ
तिसूत्रेनिरूपितइतिविस्तरःसीमांसायांपस्तुकाशीमरणेनमोक्षइतितत्रापिनकाशीमरणंसाधनंकिंतु

ज्ञानवज्ञानंचविशिष्यगुरोः शिवस्योपदेशाद्ध्रुवमेवजायतइतिविस्तरस्तुक्तस्मिन्नुपानेहप्रतन्यतइ
तिदिक् भगवद्गीतायामपिश्रीभगवतायुद्धमेवक्षात्रियस्योत्कृष्टमुक्तं स्वधर्ममपिचावेक्ष्यनविकंपितुम
र्हसि धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यते यदृच्छयाचोपपन्नंस्वर्गद्वारमपावृतं सुखिनःक्षत्रि
याःपार्थलभंतेयुद्धमीदृशं अथचेत्त्वमिमंधर्म्यंसंग्रामंनकरिष्यसि ततःस्वधर्मंकीर्तिंचहित्वापापम
वाप्स्यसि अकीर्तिंचापिभूतानिकथयिष्यंतितेव्ययं संभावितस्यचाकीर्तिर्मरणादतिरिच्यते भयाद्र
णादुपरतंमंस्यंतेत्वांमहारथाः येषांचत्वंबहुमतोभूत्वायास्यसिलाघवं अवाच्यवादांश्चबहून्वदिष्यं
तितवाहिताः निंदंतस्तवसामर्थ्यं ततोदुःखतरंनुकिं हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीं त
स्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयइतितथाविराटोभारते गजोगजेनयातव्यस्तुरगेणतुरंग
मः रथिनाचरथीयोज्यःपत्तिनापत्तिरेवच यथायोग्यंतुसंयोज्यघनधर्मेणनहीयते एवमसंभवेप्रका
चेति पलायनेदोषमाहमनुः यस्तुभीतःपरावृत्तःसंग्रामेहन्यतेपरैः यत्किंचिद्दुष्कृतंतत्तुतत्सर्वं
प्रतिपद्यते भर्तास्यसुकृतंकिंचिदमुत्रार्थमुपार्जितं भर्तातत्सर्वमादत्तेपरावृत्तहतस्यच उपपुराणे
योगयात्रायां जीवतोपिनिहतस्यवारणे धर्मएवविहिनस्त्यस्यद्ध्यतः निश्चयात्तुमरणंहिसंग्रा

५८ रं नैव भीरुरजरामरः क्वचित् मानमात्रमवलंब्य युते कीटकोपि विहगोप्यवाप्नुते कोलिनामपुरुषस्य
तेद्रणं स्वर्गमानसुखकीर्तिवित्तदं नानामुरणेपि यदस्ति मरसपास्य नास्ति मृत्योर्भयमिति युक्तमतो
न्यतः त्वयात्तु अप्यमरणमवश्यमेव जंतोः किमिति मुधा मलिनयशः कुरु धर्ममिति अवध्यानाहम
नुः न च हन्यात् स्थलारूढं न क्लीबं न कृतांजलिं न मुक्तकेशमासीनं न तवास्मीतिवादिनं न सुप्तं न
विसन्नाहं न नग्नं न निरायुधं नायुध्यमानं पश्यंतं न परेण समागतं न परेण समागतं न भीतं न प
रावृत्तं सतां धर्ममनुस्मरन् राजधर्मेषु वृद्धो बालो न हंतव्यो नैव स्त्री नैव च द्विजः तृणपूर्णमुख
श्चैव तवास्मीति च यो वदेत् शंखः न पानीयं पिबंतं भुंजानं नोपानहौ प्रमुंचंतं तनावर्माणं सवर्मानुस्त्रि
यं न करेणुं न वाजिनं न सारथिनं न दूतं ब्राह्मणं न राजानं मराजा हन्यात् रणे वदानसुक्तं नीतिसारे
प्रत्यग्रे कर्मणि कृते श्लाघमानः कृतादरः योधेभ्यस्तु ततो दद्यात् कोटिहोतुर्नयुध्यते नृपारूप्यं
हेम चकुप्यं योयज्जयति तस्य तत् दद्यात् हस्त्यवं तु रूपं च हस्त्यायोधान् प्रहर्षयन्नितिद्रजितवीरोस्मा
हंगत्र धर्मयुद्ध एवं राजा पाररा द्वाज्जितो ताएव प्रजाः पितृवत्पालयेत् तच्चोक्तं पूर्वमेव अ
यवीरोत्साहगर्भो निंदापरिहारः भारते युधिष्ठिरं भीमप्रश्ने भीष्मं प्रति क्षात्रधर्मान्न पापी
यान् धर्मोस्ति भरतर्षभ अभियाने च युद्धे च राजा हंति महाजनं अपश्यत्कर्मणा केन लोका ५८

नृजयति पार्थिवः विद्धन् जिज्ञासमानाय प्रब्रूहि भरतर्षभ निग्रहेण च पापानां साधूनां ग्रहणेन
च यज्ञैर्दानैश्च राजानो भवंति शुचयो मला उपरुंधंति राजानो भूतानि विजयार्थिनः त एव विज
यं प्राप्य वर्द्धयंति पुनः प्रजाः आपतत्विभ्यतिपापानि दानयज्ञतपोबलैः अनुग्रहेण भूतानां पुण्य
मेषां विवर्द्धते एवं शस्त्राणि मुंचंतो घ्नंति वध्यान्नेकधा तस्यैषां निष्कृतिर्दृष्टा भूतानां भावनं पुनः
यो भूतानि धनाज्यासा वधात्क्लेशयन्नृपः क्षितिं दस्युभ्यः प्राणदानाच्च स धर्मः सुखदो विराट् स सर्व
यज्ञैराजानो राजाप्याभयदक्षिणः अनुभूय हि भद्राणि प्राप्नोतींद्र सलोकतां ब्राह्मणार्थे समुत्पन्ने
यो भिनिःसज्य युध्यति आत्मानं यूपमुत्सृत्य स यज्ञोनंतदक्षिणः आभीतो विकिरन् शत्रून् प्रति
तिष्ठन् युगे यावंतः शोणितं तेलोकान्सर्वान्कामदुघाक्षयान् पदस्पर्कधिरंगात्रोदाहवेषु प्रवर्तते
य इति धर्मविदो विदुः तथा पतत्यनिमुखः शूरः पराक्षतः यत्नौयते आस्थायतस्यपरमं ध्यानं सहा
पान्विषमेत्यजेत् मास्मतास्तादृशास्तात मोदिष्ठाः पुरुषाधमान् ये सहायान् रणे हित्वा स्वस्ति
मनोगृहान्ययुः अस्वस्ति तस्मैः कुर्वंति देवा इंद्रपुरोगमाः त्यागेन यः सहायानां स्वान्प्राणान्त्रातुमि
च्छति तं हन्युः काष्ठलोष्टैर्वा दहेयुर्वा कटाग्निना पशुवन्मारयेयुर्वा क्षत्रिया ये स्युरीदृशाः अनीदृशः

अभीरवः शूराद्युत्सर्पः अधमक्षत्रियस्त्वेषपदश्यामरणं नवेत् विसर्जनश्चेष्वपि तन्निरूपणं
परि देवयन अविक्षतेन देहेन प्रलयं योधिगच्छति स एष कुकर्दमंकुलाङ्गारः तैः परिपारितः तीक्ष्णैः
शस्त्रैः क्षतो निर्भिन्नः क्षत्रियो वधमर्हति शूरो हि सत्वसंतुष्ट्या मा मा विद्धो सुध्यते भूरं कृत्यमानानि गा
त्राणि परैर्नैवावबुध्यते ससंख्ये निधनं प्राप्य प्रशस्तं लोकपूजितं स्वधर्मं विपुलं प्राप्य शक्रस्य
तिसलोकतां यत्र तत्र हतः शूरः शत्रुभिः परिवारितः अक्षयान् लभते लोकान् यदि दैन्यं न भाष
ते इति वीरोत्साहगर्भो विचिकित्सापरिहारः अथ क्रीडा नृपाहता राजनीतिमयूखे शंकर
नंदनः श्रीनीलकंठो वदति क्रीडां बुद्धिबलाश्रितां १ परफलके वा भुवि वा पकार्यं प्रागग्रं रेखानुव
र्तं तथैव उदग्दिगग्रं न वकं समानमेव चतुःषष्टिपदं हि तत्स्यात् कोणद्वयोः हंसपदं तत् पदं गपतेर्
त्रिगंदिक्षुपदद्वयं यं मध्ये चतुष्कं च समं क्यत तत्र स्थाप्यं च संग्रामिकसैन्ययुग्मं २ अंते स्वच
पदेषु मध्यपदयो राजा च मंत्री तयोः द्वौ पार्श्वगतौ तयोः राधृत पाबाहो तयोर्दंतिनौ तदग्रयाध
र पंक्तिगा वस्तुक्तिताः स्थाप्याः बुधैः पत्तयः स्थाप्य चाप्यपर त्रसैन्यमुभयं चेवं रणाय द्यतं ४ राजा
दिक्षु विदिक्षु चाष्टपदगो मंत्री विदिक्ष्वाग्रगश्चैकैकं क्रमतस्तु भंरवजतपामध्यं विहायापरं वाजी
दिक्पदतो विदिग्गतपदे घ्रष्टव्यपोकुंजरः पत्तोस्सर्वपदेषु वक्रगतिमान् पत्तिः पुरो गच्छति ५ ५५
एकैकं विनिहंति वक्रगमनैनैवं पदे यांति मेषा ज्ञो मंत्रविपर्ययात् इतो वृत्तः पदप्रवर्गे अंते हस्त

पदं तु सचेंद्रु पगतस्तत्रैव मंत्री भवेन्नो पूर्वं परिवर्ततेन कल्पिताभाबे हसम्यक् क्रमात् अनावृत्ति पुनरावृत्ति भेदा
त्क्रीडा द्विधेष्यते पदतस्थाप्यमेदेन तत्राद्याद्विधामता ६ सचिवाग्रगतो ततः पदाति सचिवीता वं तु गं
त्रचालनीयौ पदयुग्ममिति हि संप्रदायः पदगो न्योपि परैः प्रवर्तते त्र ७ गतागते रथयोर्द्वयोर्नचांतरा निवर्तकः
पुरस्थिताहयादयो गजस्यते निवर्तकाः ८ मंत्रिणः प्रथकोणस्थो स्थाप्यो पत्नीस्थिरावुभौ तथा क्रमेणकस्या
पि पश्चात् छंखलगावुभौ ९ व्यूहद्वयमिदं चक्रं व्यूहव्यत्यस्मारणं त्रित्रिप्रकारो घमनंतु रोरवराः प्रकीर्तितः
परस्पराज्ञोभिमुखं द्विषं स्थाप्यमध्यतः स्त्रीयान्यस्यापस्तरणात् कदीरः स प्रकीर्तितः न सांग्रामिकः कोपि
संस्थापनीयो विनासंश्रयो नीचरः ष्टः नैव संश्रयो भूपतेरन्यदृष्टो नवा मारणं भूपतेस्त्विष्टमेव संरोधनं
राजजयो मतोत्र तदर्द्धतैकाकितया प्रदिष्टा साचेच्चतुःषष्टिमिता क्रमेण स्युर्यस्य सोपत्रयना जिनस्या
त् राज्ञो विरुद्ध सायुतो नवेत्स्यात् न चास्य पदोगतिमान् द्वितीयः प्रमापयेत्सोपि विपक्षपक्षे समीपगं स्व
स्य निरोधनक्षमं निरुध्यमानस्य नृपस्य सोपि ज्ञिष्येत पदैकतस्त देव तत्क्रीडकः संगणयेत् प्रतीयां स्ते
ऽत्मनोद्वाचपतान्दिनिघ्नात् कलात्पदान् गणयेत्प्रतीपक्रीडाश्चतुःषष्टिमिताः सहीनः तन्मध्यएवा
स्य पराजयः स्यात् ततोधिको सौ विपरीतकश्च १५ अथाश्वस्य चतुःषष्टिपदगमनप्रकारः सिंहलद्वीपराज्ञः
श्लोकौ सिंहलीवनिवप्रजापाकं श्रीदमनो विलीवाहलसहुनंतं तिमेपेतु एपधाज्ञिकु श्रीसिंहणे सुहीपा
जमेधा विकुलकबहु पदेन वाजिनो ज्ञानं चलनं प्रतिवेस्मनि अत्र चतुःषष्टिपदं मंडलं कृत्वा तत्रैनैकृती

५८ मारभ्यास्तिनहित्यादिश्लोकाक्षराणिलिखित्वापुनस्तान्येवेशानीतोलिखित्वाश्रीसिंहगेत्यादिश्लोकाक्षराणि
लिखित्वापुनस्तान्येवेशानीतोलिखित्वाश्रीसिंहगेत्यादिश्लोकाक्षराणिवाचपत्रस्थंनयेत इति अपतानं
चरणानांश्लोकौनिनानांत्रितमेजक्कच्छगभेगभवस्त रातिरोतिषभरात्रिवाप्त्रवेहाच्छिहंयगो नाराय
णाद्धारामेग्रामजनिः प्रतिसज्जाति निःशापसंक्रूरोवाहस्वगेहान्तात्रिषाष्टमित अपनामकः प्रकारः अथ
वस्वैकमष्टद्विगुणिखविधुपदाविन्दिङुनांदस्संशंनदैकंपंचयुग्मंशरहरनयनंखाभ्रगांत्रित्रिपृक्तं अं
ग्व अभ्राद्व्योमचंद्रयुगमितखुडराडाक्षिषाड्रि पंचोपात्येवस्वाद्यभ्रामिज्वलनखुधाधिकुवेदं
त्रित्रिषष्टं षट्चंद्रनेत्रयुग्मंनिजमुदधिदङ्ः दवेघ्राभ्रगाविव्योमतर्लघीष्ट्वेछंपुनरनरूपादितो
वाजिनंनीलकंठे: १ इतिश्रीजगद्गुरुनारायणभट्टसूनुतपंडितकुमारिलमीमांसाद्वैतसा
म्राज्यधुरंधरभट्टशंकरात्मजभट्टरंगनाथपदाम्भोदरन्हाहिंहानुजभट्टनीलकंठकृतेभास्करेनी
तिमयूखः समाप्तः ॥ ॐ श्रीजगदंबसमर्प्प ॐ ॐ ॐ ॐ ॐ